# श्रीराधासुधानिधि स्तोत्रम्

द्वितीय संस्करण

प्रकाशित ३१ अगस्त  २०२५

श्रीराधाष्टमी, भाद्रपद, शुक्लपक्ष, २०८२ विक्रमी सम्वत्

श्री मानमंदिर सेवा संस्थान

Shri Maan Mandir Sewa Sansthan

http://www.maanmandir.org

info@maanmandir.org

यस्याः कदापि वसनाञ्चल खेलनोत्थ
धन्यातिधन्य पवनेन कृतार्थमानी ।
योगीन्द्र-दुर्गम-गति-र्मधुसूदनोऽपि
तस्या नमोऽस्तु वृषभानुभुवो दिशेऽपि ॥१॥

ब्रह्मेश्वरादि-सुदुरूह-पदारविन्द –
श्रीमत्पराग-परमाद्भुत-वैभवायाः ।
सर्वार्थसार-रसवर्षि-कृपार्द्र-दृष्टेस् –
तस्या नमोऽस्तु वृषभानुभुवो महिम्ने ॥२॥

यो ब्रह्म-रुद्र-शुक-नारद-भीष्ममुख्यै –
रालक्षितो न सहसा पुरुषस्य तस्य ।
सद्यो-वशीकरण-चूर्ण-मनन्त-शक्तिम्
तं राधिका-चरणरेणु-मनुस्मरामि ॥ ३ ॥

आधाय मूर्द्धनि यदापुरुदारगोप्यः
काम्यं पदं प्रियगुणैरपि पिच्छमौलेः ।
भावोत्सवेन भजतां रसकामधेनुम्
तं राधिका चरणरेणुमहं स्मरामि ॥ ४ ॥

दिव्य-प्रमोद-रससार-निजाङ्गसङ्ग –
पीयूषवीचि-निचयै-रभिषेचयन्ती ।
कन्दर्पकोटि-शर-मूर्च्छित-नन्दसूनु –
सञ्जीवनी जयति कापि निकुञ्जदेवी ॥५॥

तन्नः प्रतिक्षण-चमत्कृत-चारुलीला –
लावण्य-मोहन-महा-मधुराङ्गभङ्गि ।
राधाननं हि मधुराङ्ग-कलानिधान –
माविर्भविष्यति कदा रससिन्धुसारम् ॥६॥

यत्-किंकरीषु बहुशः खलु काकुवाणी
नित्यं परस्य पुरुषस्य शिखण्डमौलेः ।
तस्याः कदा रसनिधे-र्वृषभानुजाया –
स्तत्केलिकुञ्ज भवनाङ्गणमार्जनीस्याम् ॥७॥

वृन्दानि सर्वमहतामपहाय दूराद् –
वृन्दाटवीमनुसर प्रणयेन चेतः ।
सत्तारणीकृत सुभाव सुधारसौघम्
राधाभिधानमिह दिव्य निधानमस्ति ॥८॥

**केनापि नागरवरेण पदे निपत्य**
**सम्प्रार्थितैक-परिरम्भ-रसोत्सवायाः ।**
**सभ्रू-विभंग-मतिरंगनिधेः कदा ते**
**श्रीराधिके नहि नहीति गिरः श्रृणोमि ॥९॥**

**यत्पादपद्म-नखचन्द्र-मणिच्छटायाः**
**विस्फूर्जितं किमपि गोपवधूष्वदर्शि ।**
**पूर्णानुराग-रससागर-सारमूर्तिः**
**सा राधिका मयि कदापि कृपां करोतु ॥१०॥**

उज्जृम्भमाण-रसवारि-निधेस्तरंगै –
रङ्गैरिव प्रणयलोल-विलोचनायाः ।
तस्याः कदा नु भविता मयि पुण्यदृष्टि –
र्वृन्दाटवी-नवनिकुञ्ज-गृहाधिदेव्याः ॥ ११ ॥

वृन्दावनेश्वरि तवैव पदारविन्दम्
प्रेमामृतैक-मकरन्द-रसौघपूर्णम् ।
हृद्यर्पितं मधुपतेः स्मरतापमुग्रम्
निर्वापयत्-परमशीतल-माश्रयामि ॥ १२ ॥

**राधाकरावचित-पल्लव-वल्लरीके**
**राधापदाङ्क-विलसन्-मधुरस्थलीके ।**
**राधायशो-मुखर-मत्त-खगावलीके**
**राधा-विहार-विपिने रमतां मनो मे ॥१३॥**

**कृष्णामृतं चल विगाढु-मितीरिताहम्**
**तावत्-सहस्व रजनी सखि यावदेति ।**
**इत्थं विहस्य वृषभानुसुतेह लप्स्ये**
**मानं कदा रसद-केलिकदम्ब-जातम् ॥१४॥**

पादाङ्गुली-निहित-दृष्टि-मपत्रपिष्णुम्
दूरादुदीक्ष्य रसिकेन्द्र-मुखेन्दुबिम्बम् ।
वीक्षे चलत्पदगतिं चरिताभिरामाम्
झङ्कार-नूपुरवतीं बत कर्हि राधाम् ॥ १५ ॥

उज्जागरं रसिकनागर-सङ्गरङ्गैः
कुञ्जोदरे कृतवती नु मुदा रजन्याम् ।
सुस्नापिता हि मधुनैव सुभोजिता त्वम्
राधे कदा स्वपिषि मत्करलालितांघ्रिः ॥ १६ ॥

वैदग्ध्यसिन्धु-रनुराग-रसैकसिन्धु –
वात्सल्यसिन्धु-रतिसान्द्र-कृपैकसिन्धुः ।
लावण्यसिन्धु-रमृतच्छवि-रूपसिन्धुः
श्रीराधिका स्फुरतु मे हृदि केलि सिन्धुः ॥१७॥

दृष्ट्वैव चम्पकलतेव चमत्कृताङ्गी
वेणुध्वनिं क्व च निशम्य च विह्वलाङ्गी ।
सा श्यामसुन्दर-गुणै-रनुगीयमानैः
प्रीता परिष्वजतु मां वृषभानुपुत्री ॥१८॥

श्रीराधिके सुरतरङ्गि-नितम्बभागे
काञ्चीकलाप-कलहंस-कलानुलापैः ।
मञ्जीर-शिञ्जित-मधुव्रत-गुञ्जितांघ्रि –
पङ्केरुहैः शिशिरय स्वरसच्छटाभिः ॥१९॥

श्रीराधिके सुरतरङ्गिणि दिव्यकेलि –
कल्लोलमालिनि लसद्-वदनारविन्दे ।
श्यामा-मृताम्बुनिधि-सङ्गम-तीव्रवेगि –
न्यावर्त्त-नाभिरुचिरे मम सन्निधेहि ॥२०॥

सत्प्रेमसिन्धु-मकरन्द-रसौघधारा –
सारा-नजस्त्र-मभितः स्त्रवदाश्रितेषु ।
श्रीराधिके तव कदा चरणारविन्दम्
गोविन्द-जीवनधनं शिरसा वहामि ॥२१॥

सङ्केतकुञ्ज-मनु-कुञ्जर-मन्दगामि –
न्यादाय दिव्य-मृदु-चन्दन-गन्धमाल्यम् ।
त्वां कामकेलि-रभसेन कदा चलन्तीम्
राधेऽनुयामि पदवी-मुपदर्शयन्ती ॥२२॥

गत्वा कलिन्दतनया-विजनावतार –
मुद्वर्त्तयन्त्य-मृत-मङ्ग-मनङ्गजीवम् ।
श्रीराधिके तव कदा नवनागरेन्द्रम्
पश्यामि मग्न नयनं स्थितमुच्चनीपे ॥ २३ ॥

सत्प्रेमराशि-सरसो विकसत्-सरोजम्
स्वानन्द-सीधु-रससिन्धु-विवर्द्धनेन्दुम् ।
तच्छ्रीमुखं कुटिल-कुन्तल-भृङ्गजुष्टम्
श्रीराधिके तव कदा नु विलोकयिष्ये ॥ २४ ॥

लावण्यसाररससारसुखैकसारे
कारुण्यसारमधुरच्छविरूपसारे ।
वैदग्ध्यसाररतिकेलिविलाससारे
राधाभिधे मम मनोऽखिलसारसारे ॥२५॥

चिन्तामणिः प्रणमतां व्रजनागरीणाम्
चूडामणिः कुलमणिर्वृषभानुनाम्नः ।
सा श्यामकामवरशान्तिमणिर्निकुञ्ज –
भूषामणिर्हृदयसम्पुटसन्मणिर्नः ॥२६॥

**मञ्जुस्वभावमधिकल्पलतानिकुञ्जम्**
**व्यञ्जन्तमद्भुतकृपारसपुञ्जमेव ।**
**प्रेमामृताम्बुधिमगाधमबाधमेतम्**
**राधाभिधं द्रुतमुपाश्रय साधु चेतः ॥२७॥**

**श्रीराधिकां निजविटेन सहालपन्तीम्**
**शोणाधरप्रसृमरच्छविमञ्जरीकाम् ।**
**सिन्दूरसंवलितमौक्तिकपंक्तिशोभाम्**
**यो भावयेद्दशनकुन्दवतीं स धन्यः ॥२८॥**

पीतारुणच्छविमनन्ततडिल्लताभाम्
प्रौढानुरागमदविह्वलचारुमूर्तिम् ।
प्रेमास्पदां व्रजमहीपतितन्महिष्यो –
गोंविन्दवन्मनसि तां निदधामि राधाम् ॥२९॥

निर्माय चारुमुकुटं नवचन्द्रकेण
गुञ्जाभिरारचितहारमुपाहरन्ती ।
वृन्दाटवीनवनिकुञ्जगृहाधिदेव्याः
श्रीराधिके तव कदा भवितास्मि दासी ॥३०॥

संकेतकुञ्जमनुपल्लवमास्तरीतुम्
तत्तत्प्रसादमभितः खलु संवरीतुम् ।
त्वां श्यामचन्द्रमभिसारयितुं धृताशे
श्रीराधिके मयि विधेहि कृपाकटाक्षम् ॥ ३१ ॥

दूरादपास्य स्वजनान्सुखमर्थकोटिम्
सर्वेषु साधनवरेषु चिरं निराशः ।
वर्षन्तमेव सहजाद्भुतसौख्यधाराम्
श्रीराधिकाचरणरेणुमहं स्मरामि ॥ ३२ ॥

वृन्दाटवीप्रकटमन्मथकोटिमूर्त्तेः
कस्यापि गोकुलकिशोरनिशाकरस्य ।
सर्वस्वसम्पुटमिव स्तनशातकुम्भ –
कुम्भद्वयं स्मर मनो वृषभानुपुत्र्याः ॥ ३३ ॥

सान्द्रानुरागरससारसरः सरोजम्
किं वा द्विधा मुकुलितं मुखचन्द्रभासा ।
तन्नूतनस्तनयुगं वृषभानुजायाः
स्वानन्दसीधुमकरन्दघनं स्मरामि ॥ ३४ ॥

क्रीडासरः कनकपङ्कजकुड्मलाय
स्वानन्दपूर्णरसकल्पतरोः फलाय ।
तस्मै नमो भुवनमोहनमोहनाय
श्रीराधिके तव नवस्तनमण्डलाय ॥३५॥

पत्रावलीं रचयितुं कुचयोः कपोले
बद्धुं विचित्रकबरीं नवमल्लिकाभिः ।
अङ्गं च भूषयितुमाभरणैर्धृताशे
श्रीराधिके मयि विधेहि कृपावलोकम् ॥३६॥

श्यामेति सुन्दरवरेति मनोहरेति
कन्दर्पकोटिललितेति सुनागरेति ।
सोत्कण्ठमह्नि गृणती मुहुराकुलाक्षी
सा राधिका मयि कदा नु भवेत्प्रसन्ना ॥३७॥

वेणुः करान्निपतितः स्खलितं शिखण्डम्
भ्रष्टं च पीतवसनं व्रजराजसूनोः ।
यस्याः कटाक्षशरपातविमूर्च्छितस्य
तां राधिकां परिचरामि कदा रसेन ॥३८॥

तस्या अपाररससारविलास मूर्त्तै –
रानन्दकन्दपरमाद्भुतसौम्यलक्ष्म्याः ।
ब्रह्मादिदुर्गमगते वृषभानुजायाः
कैङ्कर्यमेव मम जन्मनि जन्मनि स्यात् ॥३९॥

पूर्णानुरागरसमूर्ति तडिल्लताभम्
ज्योतिः परं भगवतो रतिमद्रहस्यम् ।
यत्प्रादुरस्ति कृपया वृषभानु गेहे
स्यात्किङ्करी भवितुमेव ममाभिलाषः ॥४०॥

प्रेमोल्लसद्रसविलासविकासकन्दम्
गोविन्दलोचनवितृप्तचकोरपेयम् ।
सिञ्चन्तमद्भुतरसामृतचन्द्रिकौघैः
श्रीराधिका वदनचन्द्रमहं स्मरामि ॥४१॥

संकेतकुञ्जनिलये मृदुपल्लवेन
क्लृप्ते कदापि नवसंगभयत्रपाढ्याम् ।
अत्याग्रहेण करवारिरुहे गृहीत्वा
नेष्ये विटेन्द्रशयने वृषभानुपुत्रीम् ॥४२॥

सद्गन्धमाल्यनवचन्द्रलवङ्गसङ्ग –
ताम्बूलसम्पुटमधीश्वरि मां वहन्तीम् ।
श्यामं तमुन्मदरसादभिसंसरन्ती
श्रीराधिके करुणयानुचरीं विधेहि ॥४३॥

श्रीराधिके तव नवोद्गमचारुवृत्त –
वक्षोजमेव मुकुलद्वयलोभनीयम् ।
श्रोणीं दधद्रसगुणैरुपचीयमानम्
कैशोरकं जयति मोहनचित्तचोरम् ॥४४॥

संलापमुच्छलदनङ्गतरङ्गमाला –
संक्षोभितेन वपुषा व्रजनागरेण ।
प्रत्यक्षरं क्षरदपाररसामृताब्धिम्
श्रीराधिके तव कदा नु शृणोम्यदूरात् ॥४५॥

अङ्कस्थितेऽपि दयिते किमपि प्रलापम्
हा मोहनेति मधुरं विदधत्यकस्मात् ।
श्यामानुरागमदविह्वलमोहनाङ्गी
श्यामामणिर्जयति कापि निकुञ्जसीम्नि ॥४६॥

कुञ्जान्तरे किमपि जातरसोत्सवायाः
श्रुत्वा तदालपितशिंजितमिश्रितानि ।
श्रीराधिके तव रहःपरिचारिकाहम्
द्वारस्थिता रसह्रदे पतिता कदा स्याम् ॥४७॥

वीणां करे मधुमतीं मधुरस्वरां ता –
माधाय नागरशिरोमणिभावलीलाम् ।
गायन्त्यहो दिनमपारमिवाश्रुवर्षै –
र्दुःखान्नयन्त्यहह सा हृदि मेऽस्तु राधा ॥४८॥

अन्योन्यहासपरिहासविलासकेलि –
वैचित्र्यजृम्भितमहारसवैभवेन ।
वृन्दावने विलसतापहृतं विदग्ध –
द्वन्द्वेन केनचिदहो हृदयं मदीयम् ॥४९॥

महाप्रेमोन्मीलन्नवरससुधासिन्धुलहरी –
परीवाहैर्विश्वं स्नपयदिव नेत्रान्तनटनैः ।
तडिन्मालागौरं किमपि नवकैशोरमधुरम्
पुरन्ध्रीणां चूडाभरणनवरत्नं विजयते ॥५०॥

अमन्द प्रेमाङ्क श्लथ सकल निर्बन्ध हृदयम्
दयापारं दिव्यच्छवि मधुर लावण्य ललितम् ।
अलक्ष्यं राधाख्यं निखिलनिगमैरप्यतितराम्
रसाम्भोधेः सारं किमपि सुकुमारं विजयते ॥५१॥

दुकूलं बिभ्राणामथ कुचतटे कञ्चुकपटम्
प्रसादं स्वामिन्याः स्वकरतलदत्तं प्रणयतः ।
स्थितां नित्यं पार्श्वे विविधपरिचर्यैकचतुराम्
किशोरीमात्मानं किमिह सुकुमारीं नु कलये ॥५२॥

विचिन्वन्ती केशान् क्वचन करजैः कञ्चुकपटम्
क्व चाप्यामुञ्चन्ती कुचकनकदीव्यत्कलशयोः ।
सुगुल्फे न्यस्यन्ती क्वचन मणिमञ्जीरयुगलम्
कदा स्यां श्रीराधे तव सुपरिचारिण्यहमहो ॥५३॥

अतिस्नेहाद्-उच्चैरपि च हरिनामानि गृणतस् –
तथा सौगन्धाद्यैर्बहुभिरुपचारैश्च यजतः ।
परानन्दं वृन्दावनमनुचरन्तं च दधतो –
मनो मे राधायाः पदमृदुलपद्मे निवसतु ॥५४॥

निजप्राणेश्वर्याः यदपि दयनीयेयमिति माम्
मुहुश्चुम्बत्यालिङ्गतिसुरतमाध्व्या मदयति ।
विचित्रां स्नेहर्द्धिं रचयति तथाप्यद्भुतगतेस्–
तवैव श्रीराधे पदरसविलासे मम मनः ॥५५॥

प्रीतिं कामपि नाममात्रजनितप्रोद्दामरोमोद्गमाम्
राधामाधवयोः सदैव भजतोः कौमार एवोज्ज्वलाम् ।
वृन्दारण्यनवप्रसूननिचयानानीय कुञ्जान्तरे
गूढं शैशवखेलनैर्बत कदा कार्यो विवाहोत्सवः ॥५६॥

विपञ्चितसुपञ्चमं रुचिरवेणुना गायता
प्रियेण सह वीणया मधुरगानविद्यानिधिः ।
करीन्द्रवनसम्मिलन्मदकरिण्युदारक्रमा
कदा नु वृषभानुजा मिलतु भानुजारोधसि ॥५७॥

सहासवरमोहनाद्भुतविलासरासोत्सवे
विचित्रवरताण्डवश्रमजलार्द्रगण्डस्थलौ ।
कदा नु वरनागरीरसिकशेखरौ तौ मुदा
भजामि पदलालनाल्ललितवीजनं कुर्वती ॥५८॥

वृन्दारण्यनिकुञ्जमञ्जुलगृहेष्वात्मेश्वरीं मार्गयन्
हा राधे सविदग्धदर्शितपथं किं यासि नेत्यालपन् ।
कालिन्दीसलिले च तत्कुचतटीकस्तूरिकापङ्किले
स्नायं स्नायमहो कुदेहजमलं जह्यां कदा निर्मलः ॥५९॥

पादस्पर्शरसोत्सवं प्रणतिभिर्गोविन्दमिन्दीवर –
श्यामं प्रार्थयितुं सुमञ्जुलरहःकुञ्जांश्च सम्मार्जितुम् ।
मालाचन्दनगन्धपूगरसवत्ताम्बूलसत्पानका –
न्यादातुं च रसैकदायिनि तव प्रेष्या कदा स्यामहम् ॥६०॥

लावण्यामृतवार्त्तया जगदिदं सम्प्लावयन्ती शरद्
राकाचन्द्रमनन्तमेव वदनज्योत्स्नाभिरातन्वती ।
श्रीवृन्दावनकुञ्जमञ्जुगृहिणी काप्यस्ति तुच्छामहो
कुर्वाणाखिलसाध्यसाधनकथां दत्त्वा स्वदास्योत्सवम् ॥६१॥

दिष्ट्या यत्र क्वचन विहिताम्रेडने नन्दसूनोः
प्रत्याख्यानच्छलत उदितोदारसङ्केतदेशा ।
धूर्तेन्द्र त्वद्भयमुपगता सा रहो नीपवाट्याम्
नैका गच्छेत् कितव कृतमित्यादिशेत् कर्हि राधा ॥६२॥

सा भ्रूनर्तनचातुरी निरुपमा सा चारुनेत्राञ्चले
लीलाखेलनचातुरी वरतनोस्तादृग्वचश्चातुरी ।
सङ्केतागम चातुरी नवनवक्रीड़ाकला चातुरी
राधाया जयतात् सखीजनपरीहासोत्सवे चातुरी ॥६३॥

उन्मीलन्मिथुनानुरागगरिमोदारस्फुरन्माधुरी –
धारासारधुरीणदिव्यललितानङ्गोत्सवैः खेलतोः ।
राधामाधवयोः परं भवतु नश्चित्ते चिरार्तिस्पृशोः
कौमारे नवकेलिशिल्पलहरीशिक्षादिदीक्षारसः ॥६४॥

कदा वा खेलन्तौ व्रजनगरवीथीषु हृदयम्
हरन्तौ श्रीराधाव्रजपतिकुमारौ सुकृतिनः ।
अकस्मात् कौमारे प्रकटनवकैशोरविभवौ
प्रपश्यन् पूर्णः स्यां रहसि परिहासादिनिरतौ ॥ ६५ ॥

धम्मिल्लं ते नवपरिमलैरुल्लसत्फुल्लमल्ली –
मालं भालस्थलमपि लसत्सान्द्रसिन्दूरविन्दुम् ।
दीर्घापाङ्गच्छविमनुपमां चारुचन्द्रांशुहासम्
प्रेमोल्लासं तव तु कुचयोर्द्वन्द्वमन्तः स्मरामि ॥ ६६ ॥

लक्ष्मीकोटिविलक्ष्यलक्षणलसल्लीलाकिशोरीशतै –
राराध्यं व्रजमण्डलेतिमधुरं राधाभिधानं परम् ।
ज्योतिः किञ्चन सिञ्चदुज्ज्वल रसप्राग्भावमाविर्भवद्
राधे चेतसि भूरिभाग्यविभवैः कस्याप्यहो जृम्भते ॥ ६७ ॥

तज्जीयान् नवयौवनोदयमहालावण्यलीलामयम्
सान्द्रानन्दघनानुरागघटितश्रीमूर्तिसम्मोहनम् ।
वृन्दारण्यनिकुञ्जकेलिललितं काश्मीरगौरच्छवि
श्रीगोविन्द इव व्रजेन्द्रगृहिणीप्रेमैकपात्रं महः ॥ ६८ ॥

प्रेमानन्दरसैकवारिधिमहाकल्लोलमालाकुला
व्यालोलारुणलोचनाञ्चलचमत्कारेण सञ्चिन्वती ।
किञ्चित् केलिकलामहोत्सवमहो वृन्दाटवीमन्दिरे
नन्दत्यद्भुतकामवैभवमयी राधा जगन्मोहिनी ॥६९॥

वृन्दारण्यनिकुञ्जसीमनि नवप्रेमानुभावभ्रमद्
भ्रूभङ्गीलवमोहितव्रजमणिर्भक्तैकचिन्तामणिः ।
सान्द्रानन्दरसामृतस्रवमणिः प्रोद्दामविद्युल्लता –
कोटिज्योतिरुदेति कापि रमणीचूडामणिर्मोहिनी ॥७०॥

लीलापाङ्गतरङ्गितैरुदभवन्नेकैकशः कोटिशः
कन्दर्पाः पुरुदर्पटङ्कृतमहाकोदण्डविस्फारिणः।
तारुण्यप्रथमप्रवेशसमये यस्या महामाधुरी –
धारानन्तचमत्कृता भवतु नः श्रीराधिका स्वामिनी ॥७१॥

यत्पादाम्बुरुहैक रेणु कणिकां मूर्ध्नां निधातुं न हि
प्रापुर्ब्रह्म शिवादयोप्यधिकृतिं गोप्येकभावाश्रया ।
सापि प्रेमसुधारसाम्बुधिनिधी राधापि साधारणी
भूता कालगतिक्रमेण बलिना हे दैव तुभ्यं नमः ॥७२॥

दूरे स्निग्धपरम्परा विजयतां दूरे सुहृन्मण्डली
भृत्याः सन्तु विदूरतो व्रजपतेरन्यः प्रसङ्गः कुतः ।
यत्र श्रीवृषभानुजा कृतरतिः कुञ्जोदरे कामिना
द्वारस्था प्रियकिङ्करी परमहं श्रोष्यामि काञ्चिध्वनिम् ॥७३॥

गौराङ्गे मृदिमास्मिते मधुरिमा नेत्राञ्चलेद्राघिमा
वक्षोजे गरिमा तथैव तनिमा मध्ये गतौ मन्दिमा ।
श्रोण्यां च प्रथिमा भ्रुवोः कुटिलिमा बिम्बाधरे शोणिमा
श्रीराधे हृदि ते रसेन जडिमा ध्यानेऽस्तु मे गोचरः ॥७४॥

प्रातः पीतपटं कदा व्यपनयाम्यन्यांशुकस्यार्पणात्
कुञ्जे विस्मृतकञ्चुकीमपि समानेतुं प्रधावामि वा ।
बध्नीयां कवरीं युनज्मि गलितां मुक्तावलीमञ्जये
नेत्रे नागरि रङ्गकैश्च पिदधाम्यङ्गव्रणं वा कदा ॥७५॥

यद् वृन्दावनमात्रगोचरमहो यन्न श्रुतीकं शिरो –
प्यारोढुं क्षमते न यच्छिवशुकादीनां तु यद् ध्यानगम् ।
यत् प्रेमामृतमाधुरीरसमयं यन्नित्यकैशोरकम्
तद् रूपं परिवेष्टुमेव नयनं लोलायमानं मम ॥७६॥

धर्माद्यर्थचतुष्टयं विजयतां किं तद्‌ वृथावार्तया
सैकान्तेश्वरभक्तियोगपदवी त्वारोपिता मूर्द्धनि ।
यो वृन्दावनसीम्नि कश्चन घनाश्चर्यः किशोरीमणिस्
तत्कैङ्कर्यरसामृताद्‌ इह परं चित्ते न मे रोचते ॥७७॥

प्रेम्णः सन्मधुरोज्ज्वलस्य हृदयं शृङ्गारलीलाकला –
वैचित्रीपरमावधिर्भगवतः पूज्यैव कापीशता ।
ईशानी च शची महासुखतनुः शक्तिः स्वतन्त्रा परा
श्रीवृन्दावननाथपट्टमहिषी राधैव सेव्या मम ॥७८॥

राधादास्यमपास्य यः प्रयतते गोविन्दसङ्गाशया
सोऽयं पूर्णसुधारुचेः परिचयं राकां विना काङ्क्षति ।
किं च श्याम रति प्रवाहलहरीबीजं न ये तां विदुः
ते प्राप्यापि महामृताम्बुधिमहो बिन्दुं परं प्राप्नुयुः ॥७९॥

कैशोराद्भुतमाधुरीभरधुरीणाङ्गच्छविं राधिकाम्
प्रेमोल्लासभराधिकां निरवधि ध्यायन्ति ये तद्धियः ।
त्यक्ताः कर्मभिरात्मनैव भगवद्धर्मैप्यहो निर्ममाः
सर्वाश्चर्यगतिं गता रसमयीं तेभ्यो महद्भ्यो नमः ॥८०॥

लिखन्ति भुजमूलतो न खलु शङ्खचक्रादिकम्
विचित्रहरिमन्दिरं न रचयन्ति भालस्थले ।
लसत्तुलसिमालिकां दधति कण्ठपीठे न वा
गुरोर्भजनविक्रमात् क इह ते महाबुद्धयः ॥८१॥

कर्माणि श्रुतिबोधितानि नितरां कुर्वन्तु कुर्वन्तु मा
गूढाश्चर्यरसाः स्त्रगादिविषयान् गृह्णन्तु मुञ्चन्तु वा ।
कैर्वा भाव रहस्यपारगमतिः श्रीराधिकाप्रेयसः
किञ्चिज्ज्ञैरनुयुज्यतां बहिरहो भ्राम्यद्भिरन्यैरपि ॥८२॥

अलं विषयवार्त्तया नरककोटिबीभत्सया
वृथा श्रुतिकथाश्रमो बत बिभेमि कैवल्यतः ।
परेशभजनोन्मदा यदि शुकादयः किं ततः
परं तु मम राधिकापदरसे मनो मज्जतु ॥८३॥

तत् सौन्दर्यं स च नववयोयौवनश्रीप्रवेशः
सा दृग्भङ्गी स च रसघनाश्चर्यवक्षोजकुम्भः ।
सोऽयं बिम्बाधरमधुरिमा तत् स्मितं सा च वाणी
सेयं लीलागतिरपि न विस्मर्यते राधिकायाः ॥८४॥

यल्लक्ष्मीशुकनारदादिपरमाश्चर्यानुरागोत्सवैः
प्राप्तं त्वत्कृपयैव हि व्रजभृतां तत्तत्किशोरीगणैः ।
तत्कैङ्कर्यमनुक्षणाद्भुतरसं प्राप्तुं धृताशे मयि
श्रीराधे नवकुञ्जनागरि कृपादृष्टिं कदा दास्यसि ॥८५॥

लब्ध्वा दास्यं तदतिकृपया मोहनस्वादितेन
सौन्दर्यश्रीपदकमलयोर्लालनैः स्वापितायाः ।
श्रीराधायाः मधुरमधुरोच्छिष्टपीयूषसारम्
भोजं भोजं नवनवरसानन्दमग्ना कदा स्याम् ॥८६॥

यदि स्नेहाद् राधे दिशसि रतिलाम्पट्यपदवीम्
गतं मे स्वप्रेष्ठं तदपि मम निष्ठां शृणु यथा ।
कटाक्षैरालोके स्मितसहचरैर्जातपुलकम्
समाश्लिष्याम्युच्चैरथ च रसये त्वत्पदरसम् ॥८७॥

कृष्णः पक्षो नवकुवलयं कृष्णसारस्तमालो
नीलाम्भोदस्तव रुचिपदं नामरूपैश्च कृष्णा ।
कृष्णे कस्मात् तव विमुखता मोहनश्याममूर्त्ता –
वित्युक्त्वा त्वां प्रहसितमुखीं किन्नु पश्यामि राधे ॥८८॥

लीलापाङ्गतरङ्गितैरिव दिशो नीलोत्पलश्यामला
दोलायत्कनकाद्रिमण्डलमिव व्योम स्तनैस्तन्वतीम् ।
उत्फुल्लस्थलपङ्कजामिव भुवं रासे पदन्यासतः
श्रीराधामनुधावतीं व्रजकिशोरीणां घटां भावये ॥८९॥

दृशौ त्वयि रसाम्बुधौ मधुरमीनवद् भ्राम्यतः
स्तनौ त्वयि सुधासरस्यहह चक्रवाकाविव ।
मुखं सुरतरङ्गिणि त्वयि विकासि हेमाम्बुजम्
मिलन्तु मयि राधिके तव कृपातरङ्गच्छटाः ॥९०॥

कान्ताढ्याश्चर्यकान्ता कुलमणिकमला कोटिकाम्यैकपादा –
म्भोजभ्राजन्नखेन्दुच्छविलवविभवा काप्यगम्या किशोरी ।
उन्मर्यादप्रवृद्धप्रणयरसमहाम्भोधिगम्भीरलीला –
माधुर्योज्जृम्भिताङ्गी मयि किमपि कृपारङ्गमङ्गीकरोतु ॥९१॥

कलिन्दगिरिनन्दिनीपुलिनमालतीमन्दिरे
प्रविष्टवनमालिना ललितकेलिलोलीकृते ।
प्रतिक्षणचमत्कृताद्भुतरसैकलीलानिधे
निधेहि मयि राधिके निजकृपातरङ्गच्छटाम् ॥९२॥

यस्यास्ते बत किङ्करीषु बहुशश्चाटूनि वृन्दाटवी –
कन्दर्पः कुरुते तवैव किमपि प्रेप्सुः प्रसादोत्सवम् ।
सान्द्रानन्दघनानुरागलहरीनिस्यन्दपादाम्बुज –
द्वन्द्वे श्रीवृषभानुनन्दिनि सदा वन्दे तव श्रीपदम् ॥९३॥

यज्जापः सकृद् एव गोकुलपतेराकर्षकस्तत्क्षणाद्
यत्र प्रेमवतां समस्तपुरुषार्थेषु स्फुरेत् तुच्छता ।
यन्नामाङ्कितमन्त्रजापनपरः प्रीत्या स्वयं माधवः
श्रीकृष्णोऽपि तदद्भुतं स्फुरतु मे राधेति वर्णद्वयम् ॥९४॥

कालिन्दीतटकुञ्जमन्दिरगतो योगीन्द्रवद् यत्पद –
ज्योतिर्ध्यानपरः सदा जपति यां प्रेमाश्रुपूर्णो हरिः ।
केनाप्यद्भुतमुल्लसद्रतिरसानन्देन सम्मोहितः
सा राधेति सदा हृदि स्फुरतु मे विद्या परा द्व्यक्षरा ॥९५॥

देवानामथ भक्तमुक्तसुहृदामत्यन्तदूरं च यत्
प्रेमानन्दरसं महासुखकरं चोच्चारितं प्रेमतः ।
प्रेम्णाकर्णयते जपत्यथ मुदा गायत्यथालिष्वयम्
जल्पत्यश्रुमुखो हरिस्तदमृतं राधेति मे जीवनम् ॥९६॥

या वाराधयति प्रियं व्रजमणिं प्रौढ़ानुरागोत्सवैः
संसिध्यन्ति यदाश्रयेण हि परं गोविन्दसख्युत्सुकाः ।
यत् सिद्धिः परमापदैकरसवत्याराधनात्ते नु सा
श्रीराधा श्रुतिमौलिशेखरलता नाम्नी मम प्रीयताम् ॥९७॥

गात्रे कोटितडिच्छवि प्रविततानन्दच्छवि श्रीमुखे
बिम्बौष्ठे नवविद्रुमच्छवि करे सत्पल्लवैकच्छविः ।
हेमाम्भोरुहकुड्मलच्छवि कुचद्वन्द्वेऽरविन्देक्षणम्
वन्दे तन्नवकुञ्जकेलिमधुरं राधाभिधानं महः ॥९८॥

मुक्तापङ्क्तिप्रतिमदशना चारुबिम्बाधरोष्ठी
मध्ये क्षामा नवनवरसावर्त्तगम्भीरनाभिः ।
पीनश्रोणिस्तरुणिमसमुन्मेषलावण्यसिन्धुर् –
वैदग्धीनां किमपि हृदयं नागरी पातु राधा ॥९९॥

स्निग्धाकुञ्चितनीलकेशि विदलद्बिम्बोष्ठिचन्द्रानने
खेलत्खञ्जनगञ्जनाक्षि रुचिमन्नासाग्रमुक्ताफले ।
पीनश्रोणि तनूदरि स्तनतटीवृत्तच्छटात्यद्भुते
राधे श्रीभुज वल्लिचारुवलये स्वं रूपमाविष्कुरु ॥१००॥

लज्जान्तःपटमारचय्य रचितस्मायप्रसूनाञ्जलौ
राधाङ्गे नवरङ्गधाम्नि ललितप्रस्तावने यौवने ।
श्रोणीहेमवरासने स्मरनृपेणाध्यासिते मोहनम्
लीलापाङ्गविचित्रताण्डवकलापाण्डित्यमुन्मीलति ॥ १०१ ॥

सा लावण्यचमत्कृतिर्नववयो रूपं च तन्मोहनम्
तत्तत्केलिकलाविलासलहरीचातुर्यमाश्चर्यभूः ।
नो किञ्चित् कृतमेव यत्र न नुतिर्नागो न वा सम्भ्रमो –
राधामाधवयोः स कोऽपि सहजः प्रेमोत्सवः पातु वः ॥ १०२ ॥

येषां प्रेक्षां वितरति नवोदारगाढानुरागान्
मेघश्यामो मधुरमधुरानन्दमूर्तिर्मुकुन्दः ।
वृन्दाटव्यां सुमहिमचमत्कारकारीण्यहो किम्
तानि प्रेक्षेऽद्भुतरसनिधानानि राधापदानि ॥ १०३ ॥

बलान् नीत्वा तल्पे किमपि परिरभ्याधरसुधाम्
निपीय प्रोल्लिख्य प्रखरनखरेण स्तनभरम् ।
ततो नीवीं न्यस्ते रसिकमणिना त्वत्करधृते
कदा कुञ्जच्छिद्रे भवतु मम राधेनुनयनम् ॥ १०४ ॥

करं ते पत्रालिं किमपि कुचयोः कर्त्तुमुचितम्
पदं ते कुञ्जेषु प्रियमभिसरन्त्या अभिसृतौ ।
दृशौ कुञ्जच्छिद्रैस्तव निभृतकेलिं कलयितुम्
यदा वीक्षे राधे तदपि भविता किं शुभदिनम् ॥ १०५ ॥

रहोगोष्ठीं श्रोतुं तव निजविटेन्द्रेण ललिताम्
करे धृत्वा त्वां वा नवरमणतल्पे घटयितुम् ।
रतामर्दस्त्रस्तं कचभरमथो संयमयितुम्
विदध्याः श्रीराधे मम किमधिकारोत्सवरसम् ॥ १०६ ॥

वृन्दाटव्यां नवनवरसानन्दपुञ्जे निकुञ्जे
गुञ्जद्भृङ्गीकुलमुखरिते मञ्जुमञ्जुप्रहासैः ।
अन्योन्यक्षेपणनिचयनप्राप्तसङ्गोपनाद्यैः
क्रीडज्जीयाद् रसिकमिथुनं क्लृप्तकेलीकदम्बम् ॥१०७॥

रूपं शारदचन्द्रकोटिवदने धम्मिल्लमल्लीस्रजाम्
आमोदैर्विकलीकृतालिपटले राधे कदा तेऽद्भुतम् ।
ग्रैवेयोज्ज्वलकम्बुकण्ठि मृदुदोर्वल्लीचलत्कङ्कणे
वीक्षे पट्टदुकूलवासिनि रणन्मञ्जीरपादाम्बुजे ॥१०८॥

इतो भयमितस्त्रपाकुलमितो यशः श्रीरितो
हिनस्त्यखिलशृङ्खलामपि सखीनिवासस्त्वया ।
सगद्गदमुदीरितं सुबहुमोहनाकाङ्क्षया
कथं कथमयीश्वरि प्रहसितैः कदा म्रेड्यसे ॥१०९॥

श्यामे चाटुरुतानि कुर्वति सहालापान् प्रणेत्री मया
गृह्णाने च दुकूलपल्लवमहो हुङ्कृत्य मां द्रक्ष्यसि ।
बिभ्राणे भुजवल्लिमुल्लसितया रोमस्त्रजालङ्कृताम्
दृष्ट्वा त्वां रसलीनमूर्तिमथ किं पश्यामि हास्यं ततः ॥११०॥

अहो रसिकशेखरः स्फुरति कोपि वृन्दावने
निकुञ्जनवनागरीकुचकिशोरकेलिप्रियः ।
करोतु स कृपां सखीप्रकटपूर्णनत्युत्सवो
निजप्रियतमापदे रसमये ददातु स्थितिम् ॥ १११ ॥

विचित्रवरभूषणोज्ज्वलदुकूलसत्कञ्चुकैः
सखीभिरिति भूषिता तिलकगन्धमाल्यैरपि ।
स्वयं च सकलाकलासु कुशलीकृता नः कदा
सुरासमधुरोत्सवे किमपि वेशयेत् स्वामिनी ॥ ११२ ॥

कदा सुमणिकिङ्किणीवलयनूपुरप्रोल्लसन्
महामधुरमण्डलाद्भुतविलासरासोत्सवे ।
अपि प्रणयिनो बृहद्भुजगृहीतकण्ठ्यो वयम्
परं निजरसेश्वरीचरणलक्ष्म वीक्षामहे ॥११३॥

यद् गोविन्दकथासुधारसह्रदे चेतो मया जृम्भितम्
यद् वा तद्गुणकीर्त्तनार्चनविभूषाद्यैर्दिनं प्रापितम् ।
यद् यत् प्रीतिरकारि तत्प्रियजनेष्वात्यन्तिकी तेन मे
गोपेन्द्रात्मजजीवनप्रणयिनी श्रीराधिका तुष्यतु ॥११४॥

रहो दास्यं तस्याः किमपि वृषभानोर्व्रजवरी –
यसः पुत्र्याः पूर्णप्रणयरसमूर्तेर्यदि लभे ।
तदा नः किं धर्मैः किमु सुरगणैः किं च विधिना
किमीशेन श्यामप्रियमिलनयत्नैरपि च किम् ॥ ११५ ॥

चन्द्रास्ये हरिणाक्षि देवि सुनसे शोणाधरे सुस्मिते
चिल्लक्ष्मीभुजवल्लि कम्बुरुचिरग्रीवे गिरीन्द्रस्तनि ।
भञ्जन्मध्यबृहन्नितम्बकदलीखण्डोरुपादाम्बुज –
प्रोन्मीलन्नखचन्द्रमण्डलि कदा राधे मयाराध्यसे ॥ ११६ ॥

राधापादसरोजभक्तिमचलामुद्वीक्ष्य निष्कैतवाम्
प्रीतः स्वं भजतोऽपि निर्भरमहाप्रेम्णाधिकं सर्वशः ।
आलिङ्गत्यथ चुम्बति स्ववदनात् ताम्बूलमास्येऽर्पयेत्
कण्ठे स्वां वनमालिकामपि मम न्यस्येत् कदा मोहनः ॥ ११७॥

लावण्यं परमाद्भुतं रतिकलाचातुर्यमत्यद्भुतम्
कान्तिः कापि महाद्भुता वरतनोर्लीलागतिश्चाद्भुता ।
दृग्भङ्गी पुनरद्भुताद्भुततमा यस्याः स्मितं चाद्भुतम्
सा राधाद्भुतमूर्तिरद्भुतरसं दास्यं कदा दास्यति ॥ ११८॥

भ्रमद्भ्रूकुटिसुन्दरं स्फुरितचारुबिम्बाधरम्
ग्रहे मधुरहुङ्कृतं प्रणयकेलिकोपाकुलम् ।
महारसिकमौलिना सभयकौतुकं वीक्षितम्
स्मरामि तव राधिके रतिकलासुखं श्रीमुखम् ॥ ११९ ॥

उन्मीलन्मुकुटच्छटापरिलसद्दिक्चक्रवालं स्फुरत्
केयूराङ्गदहारकङ्कणघटानिर्धूतरत्नच्छवि ।
श्रोणीमण्डलकिङ्किणीकलरवं मञ्जीरमञ्जुध्वनि –
श्रीमत्पादसरोरुहं भज मनो राधाभिधानं महः ॥ १२० ॥

श्यामामण्डलमौलिमण्डनमणिः श्यामानुरागस्फुरद्
रोमोद्भेदविभाविताकृतिरहो काश्मीरगौरच्छविः ।
सातीव्रोन्मदकामकेलितरला मां पातु मन्दस्मिता
मन्दारद्रुमकुञ्जमन्दिरगता गोविन्दपट्टेश्वरी ॥१२१॥

उपास्यचरणाम्बुजे व्रजभृतां किशोरीगणैर् –
महद्भिरपि पूरुषैरपरिभाव्यभावोत्सवे ।
अगाधरसधामनि स्वपदपद्मसेवाविधौ
विधेहि मधुरोज्ज्वलामिव कृतिं ममाधीश्वरि ॥१२२॥

आनम्रानन्चन्द्रमीरितदृगापाङ्गच्छटामन्थरम्
किञ्चिद् दर्शिशिरोवगुण्ठनपटं लीलाविलासावधिम् ।
उन्नीयालकमञ्जरीः कररुहैरालक्ष्य सन्नागर –
स्याङ्केऽङ्गं तव राधिके सचकितालोकं कदा लोकये ॥ १२३ ॥

राकाचन्द्रो वराको यदनुपमरसानन्दकन्दाननेन्दोस्
तत्तादृक्चन्द्रिकाया अपि किमपि कलामात्रकस्याणुतोऽपि ।
यस्याः शोणाधरश्रीविधृतनवसुधामाधुरीसारसिन्धुः
सा राधा कामबाधाविधुरमधुपतिप्राणदा प्रीयतां नः ॥ १२४ ॥

राकानेकविचित्रचन्द्र उदितः प्रेमामृतज्योतिषाम्
वीचीभिः परिपूरयेदगणितब्रह्माण्डकोटिं यदि ।
वृन्दारण्यनिकुञ्जसीमनि तदाभासः परं लक्ष्यते
भावेनैव यदा तदैव तुलये राधे तव श्रीमुखम् ॥१२५॥

कालिन्दीकूलकल्पद्रुमतल निलयप्रोल्लसत्केलिकन्दा
वृन्दाटव्यां सदैव प्रकटतररहोवल्लवीभावभव्या ।
भक्तानां हृत्सरोजे मधुररससुधास्यन्दिपादारविन्दा
सान्द्रानन्दाकृतिर्नः स्फुरतु नवनवप्रेमलक्ष्मीरमन्दा ॥१२६॥

शुद्धप्रेमैकलीलानिधिरहह महातङ्कमङ्कस्थिते च
प्रेष्ठे बिभ्रत्यदभ्रस्फुरदतुलकृपास्नेहमाधुर्यमूर्तिः ।
प्राणालीकोटिनीराजितपदसुषमामाधुरी माधवेन
श्रीराधामामगाधामृत रसभरिते कर्हि दास्येभिषिञ्चेत् ॥ १२७ ॥

वृन्दारण्यनिकुञ्जसीमसु सदा स्वानङ्गरङ्गोत्सवैर् –
माद्यन्त्यद्भुतमाधवाधरसुधामाध्वीकसंस्वादनैः ।
गोविन्दप्रियवर्गदुर्गमसखीवृन्दैरनालक्षिता
दास्यं दास्यति मे कदा नु कृपया वृन्दावनाधीश्वरी ॥ १२८ ॥

मल्लीदामनिबद्धचारुकबरं सिन्दूररेखोल्लसत्
सीमन्तं नवरत्नचित्रतिलकं गण्डोल्लसत्कुण्डलम् ।
निष्कग्रीवमुदारहारमरुणं बिभ्रद्दुकूलं नवम्
विद्युत्कोटिनिभं स्मरोत्सवमयं राधाख्यमीक्षे महः ॥ १२९ ॥

प्रेमोल्लासैकसीमा परमरसचमत्कारवैचित्र्यसीमा
सौन्दर्यस्यैकसीमा किमपि नववयोरूपलावण्यसीमा ।
लीलामाधुर्यसीमा निजजनपरमौदार्यवात्सल्यसीमा
सा राधा सौख्यसीमा जयति रतिकलाकेलिमाधुर्यसीमा ॥ १३० ॥

यस्यास्तत्सुकुमारसुन्दरपदोन्मीलन्नखेन्दुच्छटा
लावण्यैकलवोपजीविसकलश्यामामणीमण्डलम् ।
शुद्धप्रेमविलासमूर्तिरधिकोन्मीलन्महामाधुरी
धारासारधुरीणकेलिविभवा सा राधिका मे गतिः ॥१३१॥

कलिन्दगिरिनन्दिनीसलिलबिन्दुसन्दोहभृन्
मृदूद्गतिरतिश्रमं मिथुनमद्भुतक्रीडया ।
अमन्दरसतुन्दिल भ्रमरवृन्दवृन्दाटवी –
निकुञ्जवरमन्दिरे किमपि सुन्दरं नन्दति ॥१३२॥

व्याकोशेन्दीवरविकसितामन्दहेमारविन्द
श्रीमन्निस्यन्दनरतिरसान्दोलिकन्दर्पकेलि ।
वृन्दारण्ये नवरससुधास्यन्दिपादारविन्दम्
ज्योतिर्द्वन्द्वं किमपि परमानन्दकन्दं चकास्ति ॥ १३३ ॥

ताम्बूलं क्वचिदर्पयामि चरणौ संवाहयामि क्वचिन्
मालाद्यैः परिमण्डये क्वचिदहो संवीजयामि क्वचित् ।
कर्पूरादिसुवासितं क्व च पुनः सुस्वादु चाम्भोमृतम्
पायाम्येव गृहे कदा खलु भजे श्रीराधिकामाधवौ ॥ १३४ ॥

प्रत्यङ्गोच्छलदुज्ज्वलामृतरसप्रेमैकपूर्णाम्बुधिर् –
लावण्यैकसुधानिधिः पुरुकृपावात्सल्यसाराम्बुधिः ।
तारुण्यप्रथमप्रवेशविलसन्माधुर्यसाम्राज्यभूर् –
गुप्तः कोऽपि महानिधिर्विजयते राधारसैकावधिः ॥१३५॥

यस्याः स्फूर्जत्पदनख मणिज्योतिरेकच्छटायाः
सान्द्रप्रेमामृतरसमहासिन्धुकोटिर्विलासः ।
सा चेद् राधा रचयति कृपादृष्टिपातं कदाचिन्
मुक्तिस्तुच्छीभवति बहुशः प्राकृताप्राकृतश्रीः ॥१३६॥

कदा वृन्दारण्ये मधुरमधुरानन्दरसदे
प्रियेश्वर्याः केलीभवननवकुञ्जानि मृगये ।
कदा श्रीराधायाः पदकमलमाध्वीकलहरी –
परीवाहैश्चेतो मधुकरमधीरं मदयिता ॥१३७॥

राधाकेलिनिकुञ्जवीथिषु चरन् राधाभिधामुच्चरन्
राधाया अनुरूपमेव परमं धर्मं रसेनाचरन् ।
राधायाश्चरणाम्बुजं परिचरन् नानोपचारैर्मुदा
कर्हि स्यां श्रुतिशेखरोपरि चरन्नाश्चर्यचर्यां चरन् ॥१३८॥

यातायातशतेन सङ्गमितयोरन्योन्यवक्रोल्लसच्
चन्द्रालोकनसम्प्रभूतबहुलानङ्गाम्बुधिक्षोभयोः ।
अन्तःकुञ्जकुटीरतल्पगतयोर्दिव्याद्भुतक्रीडयोः
राधामाधवयोः कदा नु शृणुयां मञ्जीरकाञ्चीध्वनिम् ॥ १३९ ॥

अहो भुवनमोहनं मधुरमाधवीमण्डपे
मधूत्सवसमुत्सुकं किमपि नीलपीतच्छवि ।
विदग्धमिथुनं मिथोदृढतरानुरागोल्लसन्
मदं मदयते कदा चिरतरं मदीयं मनः ॥ १४० ॥

राधानामसुधारसं रसयितुं जिह्वास्तु मे विह्वला
पादौ तत्पदकाङ्किकतासु चरतां वृन्दाटवीवीथिषु ।
तत्कर्मैव करः करोतु हृदयं तस्याः पदं ध्यायतात्
तद्भावोत्सवतः परं भवतु मे तत्प्राणनाथे रतिः ॥ १४१ ॥

मन्दीकृत्य मुकुन्दसुन्दरपदद्वन्द्वारविन्दामल –
प्रेमानन्दममन्दमिन्दुतिलकाद्युन्मादकन्दं परम् ।
राधाकेलिकथारसाम्बुधिचलद्वीचीभिरान्दोलितम्
वृन्दारण्यनिकुञ्जमन्दिरवरालिन्दे मनो नन्दतु ॥ १४२ ॥

राधानामैव कार्यं ह्यनुदिनमिलितं साधनाधीशकोटिस् –
त्याज्यो नीराज्य राधापदकमलसुधासत्पुमर्थाग्रकोटिः ।
राधापादाब्जलीलाभुवि जयति सदा मन्दमन्दारकोटिः
श्रीराधाकिङ्करीणां लुठतिचरणयोरद्भुता सिद्धिकोटिः ॥ १४३ ॥

मिथोभङ्गीकोटिप्रवहदनुरागामृतरसो –
त्तरङ्गभ्रूभङ्गक्षुभितबहिरभ्यन्तरमहो ।
मदाघूर्णन्नेत्रं रचयति विचित्रं रतिकला –
विलासंतत्कुञ्जे जयति नवकैशोरमिथुनम् ॥ १४४ ॥

काचिद् वृन्दावननवलतामन्दिरे नन्दसूनोर् –
दृप्यद्दोष्कन्दलदृढपरीरम्भनिस्पन्दगात्री ।
दिव्यानन्ताद्भुतरसकलाः कल्पयन्त्याविरास्ते
सान्द्रानन्दामृतरसघनप्रेममूर्तिः किशोरी ॥ १४५ ॥

न जानीते लोकं न च निगमजातं कुलपरं –
परां वा नो जानात्यहह न सतां चापि चरितम् ।
रसं राधायामाभजति किल भावं व्रजमणौ
रहस्ये तद् यस्य स्थितिरपि न साधारणगतिः ॥ १४६ ॥

ब्रह्मानन्दैकवादाः कतिचन भगवद्वन्दनानन्दमत्ताः
केचिद् गोविन्दसख्याद्यनुपमपरमानन्दमन्ये स्वदन्ते ।
श्रीराधाकिङ्करीणां त्वखिलसुखचमत्कारसारैकसीमा
तत्पादाम्भोजराजन्नखमणिविलसज्ज्योतिरेकच्छटापि ॥१४७॥

न देवैर्ब्रह्माद्यैर्न खलु हरिभक्तैर्न सुहृदा –
दिभिर्यद् वै राधामधुपतिरहस्यं सुविदितम् ।
तयोर्दासीभूत्वा तदुपचितकेलीरसमये
दुरन्ताः प्रत्याशा हर हर दृशोर्गोचरयितुम् ॥१४८॥

त्वयि श्यामे नित्यप्रणयिनि विदग्धे रसनिधौ
प्रिये भूयो भूयः सुदृढमतिरागो भवतु मे ।
इति प्रेष्ठेनोक्ता रमण मम चित्ते तव वचो
वदन्तीति स्मेरा मम मनसि राधा विलसतु ॥ १४९ ॥

सदानन्दं वृन्दावननवलतामन्दिरवरेष्व् –
अमन्दैः कन्दर्पोन्मदरतिकलाकौतुकरसम् ।
किशोरं तज्ज्योतिर्युगलमतिघोरं मम भव –
ज्वलज्ज्वालं शीतैः स्वपदमकरन्दैः शमयतु ॥ १५० ॥

उन्मीलन्नवमल्लिदामविलसद्धम्मिल्लभारे बृहच् –
छ्रोणीमण्डलमेखलाकलरवे शिञ्जत्सुमञ्जीरिणि ।
केयूराङ्गदकङ्कणावलिलसद्दोर्वल्लिदीप्तिच्छटे
हेमाम्भोरुहकुड्मलस्तनि कदा राधे दृशा पीयसे ॥ १५१ ॥

अमर्यादोन्मीलत्सुरतरसपीयूषजलधेः
तरङ्गैरुत्तुङ्गैरिव किमपि दोलायिततनुः ।
स्फुरन्ती प्रेयोऽङ्के स्फुटकनकपङ्केरुहमुखी
सखीनां नो राधे नयनसुखमाधास्यसि कदा ॥ १५२ ॥

क्षरन्तीव प्रत्यक्षरमनुपमप्रेमजलधिम्
सुधाधारावृष्टीरिव विदधती श्रोत्रपुटयोः ।
रसार्द्रा सन्मृद्वी परमसुखदा शीतलतरा
भवित्री किं राधे तव सह मया कापि सुकथा ॥ १५३ ॥

अनुल्लिख्यानन्तानपि सदपराधान् मधुपतिर् –
महाप्रेमाविष्टस्तव परमदेयं विमृशति ।
तवैकं श्रीराधे गृणत इह नामामृतरसम्
महिम्नः कः सीमां स्पृशति तव दास्यैकमनसाम् ॥ १५४ ॥

लुलितनवलवङ्गोदारकर्पूरपूरम्
प्रियतममुखचन्द्रोद्गीर्णताम्बूलखण्डम् ।
घनपुलककपोला स्वादयन्ती मदास्ये –
र्पयतु किमपि दासीवत्सला कर्हि राधा ॥ १५५ ॥

सौन्दर्यामृतराशिरद्भुतमहालावण्यलीलाकला
कालिन्दीवरवीचिडम्बरपरिस्फूर्जत्कटाक्षच्छविः ।
सा कापि स्मरकेलिकोमलकलावैचित्र्यकोटिस्फुरत्
प्रेमानन्दघनाकृतिर्दिशतु मे दास्यं किशोरीमणिः ॥ १५६ ॥

दुकूलमतिकोमलं कलयदेव कौसुम्भकम्
निबद्धमधुमल्लिकाललितमाल्यधम्मिल्लकम् ।
बृहत्कटितटस्फुरन्मुखरमेखलालङ्कृतम्
कदा नु कलयामि तत्कनकचम्पकाभं महः ॥ १५७ ॥

कदा रासे प्रेमोन्मदरसविलासेऽद्भुतमये
दृशोर्मध्ये भ्राजन्मधुपतिसखीवृन्दवलये ।
मुदान्तः कान्तेन स्वरचितमहालास्यकलया
निषेवे नृत्यन्तीं व्यजननवताम्बूलशकलैः ॥ १५८ ॥

प्रसृमरपटवासे प्रेमसीमाविकासे
मधुरमधुरहासे दिव्यभूषाविलासे ।
पुलकितदयितांसे संवलद्बाहुपाशे
तदतिललितरासे कर्हि राधामुपासे ॥१५९॥

यदि कनकसरोजं कोटिचन्द्रांशुपूर्णम्
नवनवमकरन्दस्यन्दिसौन्दर्यधाम ।
भवति लसितचञ्चत्खञ्जनद्वन्द्वमास्यम्
तदपि मधुरहास्यं दत्तदास्यं न तस्याः ॥१६०॥

सुधाकरमुधाकरं प्रतिपदस्फुरन्माधुरी –
धुरीणनवचन्द्रिकाजलधितुन्दिलं राधिके ।
अतृप्तहरिलोचनद्वयचकोरपेयं कदा
रसाम्बुधिसमुन्नतं वदनचन्द्रमीक्षे तव ॥ १६१ ॥

अङ्गप्रत्यङ्गरिङ्गन्मधुरतरमहाकीर्तिपीयूषसिन्धोर् –
इन्दोः कोटिर्विनिन्दद्वदनमतिमदालोलनेत्रं दधत्याः ।
राधायाः सौकुमार्याद्भुतललिततनोः केलिकल्लोलिनीनाम्
आनन्दस्यन्दिनीनां प्रणयरसमयान् किं विगाहे प्रवाहान् ॥ १६२ ॥

मत्कण्ठे किं नखरशिखया दैत्यराजोऽस्मि नाहम्
मैवं पीडां कुरु कुचतटे पूतना नाहमस्मि ।
इत्थं कीरैरनुकृतवचः प्रेयसा सङ्गतायाः
प्रातः श्रोष्ये तव सखि कदा केलिकुञ्जे मृजन्ती ॥१६३॥

जाग्रत्स्वप्नसुषुप्तिषु स्फुरतु मे राधापदाब्जच्छटा
वैकुण्ठे नरकेथवा मम गतिर्नान्यास्तु राधां विना ।
राधाकेलिकथा सुधाम्बुधिमहावीचीभिरान्दोलितम्
कालिन्दीतटकुञ्जमन्दिरवरालिन्दे मनो विन्दतु ॥१६४॥

अलिन्दे कालिन्दीतटनवलतामन्दिरगते
रतामर्दोद्भूतश्रमजलभरापूर्णवपुषोः ।
सुखस्पर्शेनामीलितनयनयोः शीतमतुलम्
कदा कुर्यां संवीजनमहह राधामुरभिदोः ॥ १६५ ॥

क्षणं मधुरगानतः क्षणममन्दहिन्दोलतः
क्षणं कुसुमवायुतः सुरतकेलिशिल्पैः क्षणम् ।
अहो मधुरसद्रसप्रणयकेलिवृन्दावने
विदग्धवरनागरी रसिकशेखरौ खेलतः ॥ १६६ ॥

अद्य श्यामकिशोरमौलिरहह प्राप्तो रजन्या मुखे
नीत्वा तां करयोः प्रगृह्य सहसा नीपाटवीं प्राविशत् ।
श्रोष्ये तल्पमिलन्महारतिभरे प्राप्तेपि शीत्कारितम्
तद्वीचीसुखतर्जनं किमु हरेः स्वश्रोत्ररन्ध्राश्रितम् ॥१६७॥

श्रीमद्राधे त्वमथ मधुरं श्रीयशोदाकुमारे
प्राप्ते कैशोरकमतिरसाद् वल्गसे साधुयोगम् ।
इत्थं बाले महसि कथया नित्यलीलावयःश्रीः
जातावेशा प्रकटसहजा किं नु दृश्या किशोरी ॥१६८॥

एकं काञ्चनचम्पकच्छवि परं नीलाम्बुदश्यामलम्
कन्दर्पोत्तरलं तथैकमपरं नैवानुकूलं बहिः ।
किं चैकं बहुमानभङ्गि रसवच्चाटूनि कुर्वत्परम्
वीक्षे क्रीडनिकुञ्जसीम्नि तदहो द्वन्द्वं महामोहनम् ॥१६९॥

विचित्ररतिविक्रमं दधदनुक्रमाद् आकुलम्
महामदनवेगतो निभृतमञ्जुकुञ्जोदरे ।
अहो विनिमयन् नवं किमपि नीलपीतं पटम्
मिथो मिलितमद्भुतं जयति पीतनीलं महः ॥१७०॥

करे कमलमद्भुतं भ्रमयतोर्मिथोऽसार्पित –
स्फुरत्पुलकदोर्लतायुगलयोः स्मरोन्मत्तयोः ।
सहासरसपेशलं मदकरीन्द्रभङ्गीशतैर् –
गतिं रसिकयोर्द्वयोः स्मरत चारुवृन्दावने ॥ १७१ ॥

खेलन्मुग्धाक्षिमीनस्फुरदधरमणीविद्रुमश्रोणिभार –
द्वीपायामोत्तरङ्गस्मरकलभकटाटोपवक्षोरुहायाः ।
गम्भीरावर्तनाभेर्बहलहरिमहाप्रेमपीयूषसिन्धोः
श्रीराधायाः पदाम्भोरुहपरिचरणे योग्यतामेव मृग्ये ॥ १७२ ॥

विच्छेदाभासमानादहह निमिषतो गात्रविस्त्रंसनादौ
चंचत्कल्पाग्निकोटिज्वलितमिव भवेद् बाह्यमभ्यन्तरं च ।
गाढस्नेहानुबन्धग्रथितमिव ययोरद्भुतप्रेममूर्त्योः
श्रीराधामाधवाख्यं परमिह मधुरं तद्द्वयं धाम जाने ॥ १७३ ॥

कदा रत्युन्मुक्तं कचभरमहं संयमयिता
कदा वा संधास्ये त्रुटितनवमुक्तावलिमपि ।
कदा वा कस्तूर्यास्तिलकमपि भूयो रचयिता
निकुञ्जान्तर्वृत्ते नवरतिरणे यौवनमणेः ॥ १७४ ॥

किं ब्रूमोऽन्यत्र कुण्ठीकृतक जनपदे धाम्न्यपि श्रीविकुण्ठे
राधामाधुर्यवेत्ता मधुपतिरथ तन्माधुरीं वेत्ति राधा ।
वृन्दारण्यस्थलीयं परमरससुधामाधुरीणां धुरीणा
तद्द्वन्द्वं स्वादनीयं सकलमपि ददौ राधिकाकिङ्करीभ्यः ॥ १७५ ॥

लसद्वदनपङ्कजा नवगभीरनाभिभ्रमा
नितम्बपुलिनोल्लसन्मुखरकाञ्चिकादम्बिनी ।
विशुद्धरसवाहिनी रसिकसिन्धुसङ्गोन्मदा
सदा सुरतरङ्गिणी जयति कापि वृन्दावने ॥ १७६ ॥

**अनङ्गनवरङ्गिणीरसतरङ्गिणीसङ्गताम्**
**दधत् सुखसुधामये स्वतनुनीरधौ राधिकाम् ।**
**अहो मधुपकाकलीमधुरमाधवीमण्डपे**
**स्मरक्षुभितमेधते सुरतसीधुमत्तं महः ॥१७७॥**

**रोमालीमिहिरात्मजा सुललिते बन्धूकबन्धुप्रभा**
**सर्वाङ्गे स्फुटचम्पकच्छविरहो नाभीसरःशोभना ।**
**वक्षोजस्तवका लसद्भुजलता शिञ्जापतच्छुङ्कृतिः**
**श्रीराधा हरते मनो मधुपतेरन्येव वृन्दाटवी ॥१७८॥**

राधामाधवयोर्विचित्रसुरतारम्भे निकुञ्जोदर –
स्रस्तप्रस्तरसङ्गतैर्वपुरलङ्कुर्वेऽङ्गरागैः कदा ।
तत्रैव त्रुटिताः स्रजो निपतिताः सन्धाय भूयः कदा
कण्ठे धारयितास्मि मार्जनकृते प्रातः प्रविष्टास्म्यहम् ॥ १७९ ॥

श्लोकान्प्रेष्ठयशोऽङ्कितान्गृहशुकानध्यापयेत्कर्हिचिद्
गुञ्जामञ्जुलहारबर्हमुकुटं निर्माति काले क्वचित् ।
आलिख्य प्रियमूर्तिमाकुलकुचौ सङ्घट्टयेद् वा कदाप्य् –
एवं व्यापृतिभिर्दिनं नयति मे राधा प्रियस्वामिनी ॥ १८० ॥

प्रेयःसङ्गसुधासदानुभविनी भूयोभवद्भाविनी
लीलापञ्चमरागिणी रतिकलाभङ्गीशतोद्भाविनी ।
कारुण्यद्रवभाविनी कटितटे काञ्चीकलाराविणी
राधैव गतिर्ममास्तु पदयोः प्रेमामृतस्राविणी ॥ १८१ ॥

कोटीन्दुच्छविहासिनी नवसुधासम्भारसम्भाषिणी
वक्षोजद्वितयेन हेमकलशश्रीगर्वनिर्वासिनी ।
चित्रग्रामनिवासिनी नवनवप्रेमोत्सवोल्लासिनी
वृन्दारण्यविलासिनी किमुरहोभूयाद्धृदुल्लासिनी ॥ १८२ ॥

कदा गोविन्दाराधनललितताम्बूलशकलम्
मुदा स्वादं स्वादं पुलकिततनुर्मे प्रियसखी ।
दुकूलेनोन्मीलन्नवकमलकिञ्जल्करुचिना
निवीताङ्गी सङ्गीतकनिजकलाः शिक्षयति माम् ॥ १८३ ॥

लसद्दशनमौक्तिकप्रवरकान्तिपूरस्फुरन् –
मनोज्ञनवपल्लवाधरमणिच्छटासुन्दरम् ।
चरन्मकरकुण्डलं चकितचारुनेत्राञ्चलम्
स्मरामि तव राधिके वदनमण्डलं निर्मलम् ॥ १८४ ॥

चलत्कुटिलकुन्तलं तिलकशोभिभालस्थलम्
तिलप्रसवनासिकापुटविराजिमुक्ताफलम् ।
कलङ्करहितामृतच्छविसमुज्ज्वलं राधिके
तवातिरतिपेशलं वदनमण्डलं भावये ॥ १८५ ॥

पूर्णप्रेमामृतरससमुल्लाससौभाग्यसारम्
कुञ्जे कुञ्जे नवरतिकलाकौतुकेनात्तकेलि ।
उत्फुल्लेन्दीवरकनकयोः कान्तिचौरं किशोरम्
ज्योतिर्द्वन्द्वं किमपि परमानन्दकन्दं चकास्ति ॥ १८६ ॥

ययोन्मीलत्केलीविलसितकटाक्षैककलया
कृतो बन्दी वृन्दाविपिनकलभेन्द्रो मदकलः ।
जडीभूतः क्रीडामृग इव यदाज्ञालवकृते
कृती नः सा राधा शिथिलयतु साधारणगतिम् ॥ १८७ ॥

श्रीगोपेन्द्रकुमारमोहनमहाविद्ये स्फुरन्माधुरी –
सारस्फाररसाम्बुराशिसहजप्रस्यन्दिनेत्राञ्चले ।
कारुण्यार्द्रकटाक्षभङ्गिमधुरस्मेराननाम्भोरुहे
हा हा स्वामिनि राधिके मयि कृपादृष्टिं मनाङ्निक्षिप ॥ १८८ ॥

ओष्ठप्रान्तोच्छलितदयितोद्गीर्णताम्बूलरागा
    रागानुच्चैर्निजरचितया चित्रभङ्ग्योन्नयन्ती ।
तिर्यग्ग्रीवा रुचिररुचिरोदञ्चदाकुञ्चितभ्रूः
    प्रेयःपार्श्वे विपुलपुलकैर्मण्डिता भाति राधा ॥१८९॥

किं रे धूर्त्तप्रवर निकटं यासि नः प्राणसख्या
    नूनं बाला कुचतटकरस्पर्शमात्राद् विमुह्येत् ।
इत्थं राधे पथि पथि रसान् नागरं तेऽनुलग्नम्
    क्षिप्त्वा भङ्ग्या हृदयमुभयोः कर्हि संमोहयिष्ये ॥१९०॥

कदा वा राधायाः पदकमलमायोज्य हृदये
दयेशं निःशेषं नियतमिह जह्यामुपविधिम् ।
कदा वा गोविन्दः सकलसुखदः प्रेमकरणाद्
अनन्ये धन्ये वै स्वयमुपनयेत स्मरकलाम् ॥ १९१ ॥

कदा वा प्रोद्दामस्मरसमरसंरम्भरभस –
प्ररूढस्वेदाम्भःप्लुतलुलितचित्राखिलतनू ।
गतौ कुञ्जद्वारे सुखमरुति संवीज्य परया
मुदाहं श्रीराधारसिकतिलकौ स्यां सुकृतिनी ॥ १९२ ॥

मिथःप्रेमावेशाद् घनपुलकदोर्वल्लिरचित –
प्रगाढाश्लेषेणोत्सवरसभरोन्मीलितदृशौ ।
निकुञ्जक्लृप्ते वै नवकुसुमतल्पेऽभिशयितौ
कदा पत्संवाहादिभिरहमधीशौ नु सुखये ॥ १९३ ॥

मदारुणविलोचनं कनकदर्पकामोचनम्
महाप्रणयमाधुरीरसविलासनित्योत्सुकम् ।
लसन्नववयःश्रिया ललितभङ्गिलीलामयम्
हृदा तदहमुद्वहे किमपि हेमगौरं महः ॥ १९४ ॥

मदाघूर्णन्नेत्रं नवरतिरसावेशविवशो –
ल्लसद्गात्रं प्राणप्रणयपरिपाट्यां परतरम् ।
मिथोगाढाश्लेषाद् वलयमिव जातं मरकत –
द्रुतस्वर्णच्छायं स्फुरतु मिथुनं तन्मम हृदि ॥ १९५ ॥

परस्परं प्रेमरसे निमग्नम् अशेषसम्मोहनरूपकेलि ।
वृन्दावनान्तर्नवकुञ्जगेहे तन्नीलपीतं मिथुनं चकास्ति ॥ १९६ ॥

आशास्य दास्यं वृषभानुजाया –
स्तीरे समध्यास्य च भानुजायाः ।
कदा नु वृन्दावनकुञ्जवीथी –
ष्वहं नु राधे ह्यतिथिर्भवेयम् ॥१९७॥

कालिन्दीतटकुञ्जे पुञ्जीभूतं रसामृतं किमपि ।
अद्भुतकेलिनिधानं निरवधि राधाभिधानमुल्लसति ॥१९८॥

प्रीतिरेव मूर्तिमती रससिन्धोः सारसम्पदिव विमला ।
वैदग्धीनां हृदयं काचन वृन्दावनाधिकारिणी जयति ॥१९९॥

रसघनमोहनमूर्तिं विचित्रकेलिमहोत्सवोल्लसितम् ।
राधाचरणविलोडितरुचिरशिखण्डं हरिं वन्दे ॥२००॥

कदा गायं गायं मधुरमधुरीत्या मधुभिदश् –
चरित्राणि स्फारामृतरसविचित्राणि बहुशः ।
मृजन्ती तत्केलीभवनमभिरामं मलयज –
च्छटाभिः सिञ्चन्ती रसहृदनिमग्नास्मि भविता ॥२०१॥

उदञ्चद्रोमाञ्चप्रचयखचितां वेपथुमतीम्
दधानां श्रीराधामतिमधुरलीलामयतनुम् ।
कदा वा कस्तूर्या किमपि रचयन्त्येव कुचयोर् –
विचित्रां पत्रालीमहमहह वीक्षे सुकृतिनी ॥२०२॥

क्षणं सीत्कुर्वन्ती क्षणमथ महावेपथुमती
क्षणं श्याम श्यामेत्यमुमभिलपन्ती पुलकिता ।
महाप्रेमा कापि प्रमदमदनोद्दामरसदा
सदानन्दा मूर्तिर्जयति वृषभानोः कुलमणिः ॥२०३॥

यस्याः प्रेमघनाकृतेः पदनखज्योत्स्नाभरस्नापित –
स्वान्तानां समुदेति कापि सरसा भक्तिश्चमत्कारिणी ।
सा मे गोकुल भूपनन्दनमनश्चोरी किशोरी कदा
दास्यं दास्यति सर्ववेदशिरसां यत्तद्रहस्यं परम् ॥२०४॥

कामं तूलिकया करेण हरिणा यालक्तकैरङ्किता
नानाकेलिविदग्धगोपरमणीवृन्दे तथा वन्दिता ।
या सङ्गुप्ततया तथोपनिषदां हृद्येव विद्योतते
सा राधाचरणद्वयी मम गतिर्लास्यैकलीलामयी ॥२०५॥

सान्द्रप्रेमरसौघवर्षिणि नवोन्मीलन्महामाधुरी –
साम्राज्यैकधुरीणकेलिविभवत्कारुण्यकल्लोलिनि ।
श्रीवृन्दावनचन्द्रचित्तहरिणीबन्धस्फुरद्वागुरे
श्रीराधे नवकुञ्जनागरि तव क्रीतास्मि दास्योत्सवैः ॥२०६॥

स्वेदापूरः कुसुमचयनैर्दूरतः कण्टकाङ्को
वक्षोजेऽस्यास्तिलकविलयो हन्त घर्माम्भसैव ।
ओष्ठः सख्या हिमपवनतः सव्रणो राधिके ते
क्रूरास्वेवं स्वघटितमहो गोपये प्रेष्ठसङ्गम् ॥२०७॥

पातं पातं पदकमलयोः कृष्णभृङ्गेण तस्याः
स्मेरास्येन्दोर्मुकुलितकुचद्वन्द्वहेमारविन्दम् ।
पीत्वा वक्त्राम्बुजमतिरसन्नूनमन्तः प्रवेष्टुम्
अत्यावेशान् नखरशिखया पाट्यमानं किमीक्षे ॥२०८॥

अहो तेऽमी कुञ्जास्तदनुपमरासस्थलमिदम्
गिरिद्रोणी सैव स्फुरति रतिरङ्गे प्रणयिनी ।
न वीक्षे श्रीराधां हर हर कुतोपीति शतधा
विदीर्येत प्राणेश्वरि मम कदा हन्त हृदयम् ॥२०९॥

इहैवाभूत् कुञ्जे नवरतिकलामोहनतनोर् –
अहो अत्रानृत्यद् दयितसहिता सा रसनिधिः ।
इति स्मारं स्मारं तव चरितपीयूषलहरीम्
कदा स्यां श्रीराधे चकित इह वृन्दावनभुवि ॥२१०॥

श्रीमद्बिम्बाधरे ते स्फुरति नवसुधामाधुरीसिन्धुकोटिर् –
नेत्रान्तस्तेविकीर्णाद्भुतकुसुमधनुश्चण्डसत्काण्डकोटिः ।
श्रीवक्षोजे तवातिप्रमदरसकलासारसर्वस्वकोटिः
श्रीराधे त्वत्पदाब्जात् स्रवति निरवधिप्रेमपीयूषकोटिः ॥२११॥

सान्द्रानन्दोन्मदरसघनप्रेमपीयूषमूर्त्तेः
श्रीराधाया अथ मधुपतेः सुप्तयोः कुञ्जतल्पे ।
कुर्वाणाहं मृदुमृदुपदाम्भोजसंवाहनानि
शय्यान्ते किं किमपि पतिता प्राप्ततन्द्रा भवेयम् ॥२१२॥

राधापादारविन्दोच्छलितनवरसप्रेमपीयूषपुञ्जे
कालिन्दीकूलकुञ्जे हृदि कलितमहोदारमाधुर्यभावः ।
श्रीवृन्दारण्यवीथीललितरतिकलानागरीं तां गरीयो
गम्भीरैकानुरागां मनसि परिचरन् विस्मृतान्यः कदा स्याम् ॥२१३॥

अदृष्ट्वा राधाङ्के निमिषमपि तं नागरमणिम्
तया वा खेलन्तं ललितललितानङ्गकलया ।
कदाहं दुःखाब्धौ सपदि पतिता मूर्च्छितवती
न तामाश्वास्यार्त्ता सुचिरमनुशोचे निजदशाम् ॥२१४॥

भूयोभूयः कमलनयने किं मुधा वार्यतेऽसौ
वाङ्मात्रेण त्वदनुगमनं न त्यजत्येव धूर्त्तः ।
किञ्चिद् राधे कुरु कुचतटीप्रान्तमस्य म्रदीयश् –
चक्षुर्द्वारा तमनुपतितं चूर्णतामेतु चेतः ॥२१५॥

किं वा नस्तैः सुशास्त्रैः किमथ तदुदितैर्वर्त्मभिः सद्गृहीतैर् –
यत्रास्ति प्रेममूर्त्तेर्नहि महिमसुधा नापि भावस्तदीयः ।
किं वा वैकुण्ठलक्ष्म्याप्यहह परमया यत्र मे नास्ति राधा
किन्त्वाशाप्यस्तु वृन्दावनभुवि मधुरा कोटिजन्मान्तरेपि ॥२१६॥

श्याम श्यामेत्यनुपमरसापूर्णवर्णैर्जपन्ती
स्थित्वा स्थित्वा मधुरमधुरोत्तारमुच्चारयन्ती ।
मुक्तास्थूलान्नयनगलितानश्रुबिन्दून्वहन्ती
हृष्यद्रोमा प्रतिपदच्चमत्कुर्वती पातु राधा ॥२१७॥

ताद‍ृङ्मूर्तिर्व्रजपतिसुतः पादयोर्मे पतित्वा
दन्ताग्रेणाथ धृततृणकं काकुवादान्ब्रवीति ।
नित्यं चानुव्रजति कुरुते सङ्गमायोद्यमं चे
त्युद्वेगं मे प्रणयिनि किमावेदयेयं नु राधे ॥२१८॥

चलल्लीलागत्या क्वचिदनुचलद्धंसमिथुनम्
क्वचित् केकिन्यग्रे कृतनटनचन्द्रक्यनुकृति ।
लताश्लिष्टं शाखिप्रवरमनुकुर्वत् क्वचिदहो
विदग्धद्वन्द्वं तद् रमत इह वृन्दावनभुवि ॥२१९॥

**व्याकोशेन्दीवराष्टापदकमलरुचाहारि कान्त्या स्वया**
**यत् कालिन्दीयं सुरभिमनिलं शीतलं सेवमानम् ।**
**सान्द्रानन्दं नवनवरसं प्रोल्लसत्केलिवृन्दम्**
**ज्योतिर्द्वन्द्वं मधुरमधुरं प्रेमकन्दं चकास्ति ॥२२०॥**

**कदा मधुरसारिकाः स्वरसपद्यमध्यापयत्**
**प्रदाय करतालिकाः क्वचन नर्तयत् केकिनम् ।**
**क्वचित् कनकवल्लरीवृततमाललीलाधनम्**
**विदग्धमिथुनं तदद्भुतमुदेति वृन्दावने ॥२२१॥**

पत्रालीं ललितां कपोलफलके नेत्राम्बुजे कज्जलम्
रङ्गं बिम्बफलाधरे च कुचयोः काश्मीरजालेपनम् ।
श्रीराधे नवसङ्गमाय तरले पादाङ्गुलीपङ्क्तिषु
न्यस्यन्ती प्रणयादलक्तकरसं पूर्णा कदा स्यामहम् ॥ २२२ ॥

श्रीगोवर्धन एक एव भवता पाणौ प्रयत्नाद् धृतो –
राधावर्ष्मणि हेमशैलयुगले दृष्टेऽपि ते स्याद् भयम् ।
तद् गोपेन्द्रकुमार मा कुरु वृथा गर्वं परीहासतः
कर्ह्येवं वृषभानुनन्दिनि तव प्रेयांसमाभाषये ॥ २२३ ॥

**अनङ्गजयमङ्गलध्वनितकिङ्किणीडिण्डिमः**
**स्तनादिवरताडनैर्नखरदन्तघातैर्युतः ।**
**अहो चतुरनागरीनवकिशोरयोर्मञ्जुले**
**निकुञ्जनिलयाजिरे रतिरणोत्सवो जृम्भते ॥२२४॥**

**यूनोर्वीक्ष्य दरत्रपानटकलामादीक्षयन्ती दृशो –**
**र्वृण्वाना चकितेन सञ्चितमहारत्नस्तनं चाप्युरः ।**
**सा काचिद् वृषभानुवेश्मनि सखीमालासु बालावली**
**मौलिः खेलति विश्वमोहनमहासारूप्यमाचिन्वती ॥२२५॥**

ज्योतिःपुञ्जद्वयमिदमहो मण्डलाकारमस्याः
वक्षस्युन्मादयति हृदयं किं फलत्यन्यदग्रे ।
भ्रू कोदण्डं नकृतघटनं सत्कटाक्षौघबाणैः
प्राणान् हन्यात् किमु परमतो भावि भूयो न जाने ॥ २२६ ॥

भोः श्रीदामन्सुबल वृषभ स्तोककृष्णार्जुनाद्याः
किं वो दृष्टं मम नु चकिता दृग्गता नैव कुञ्जे ।
काचिद् देवी सकलभुवनाप्लाविलावण्यपूरा
दूराद् एवाखिलमहरत प्रेयसो वस्तु सख्युः ॥ २२७ ॥

गता दूरे गावो दिनमपि तुरीयांशमभजद्
वयं हातुं क्लान्तास्तव च जननी वर्त्मनयना ।
अकस्मात् तूष्णीके सजलनयने दीनवदने
लुठत्यस्यां भूमौ त्वयि नहि वयं प्राणिणिषवः ॥२२८॥

नासाग्रे नवमौक्तिकं सुरुचिरं स्वर्णोज्ज्वलं बिभ्रती
नानाभङ्गिरनङ्गरङ्गविलसल्लीलातरङ्गावलिः ।
राधे त्वं प्रविलोभय व्रजमणिं रत्नच्छटामञ्जरी
चित्रोदञ्चितकञ्चुकस्थगितयोर्वक्षोजयोः शोभया ॥२२९॥

अप्रेक्षे कृतनिश्चयापि सुचिरं वीक्षेत दृक्कोणतो
मौने दार्ढ्यमुपाश्रितापि निगदेत् तामेव याहीत्यहो ।
अस्पर्शे सुधृताशयापि करयोर्धृत्वा बहिर्यापयेद्
राधाया इति मानदुः स्थितिमहं प्रेक्षे हसन्ती कदा ॥२३०॥

रसागाधे राधाहृदि सरसि हंसः करतले
लसद्वंशास्त्रोतस्यमृतगुणसङ्गः प्रतिपदम् ।
चलत्पिच्छोत्तंसः सुरचितवतंसः प्रमदया
स्फुरद्गुञ्जागुच्छः स हि रसिकमौलिर्मिलतु माम् ॥२३१॥

अकस्मात् कस्याश्चिन् नववसनमाकर्षति परम्
मुरल्या धम्मिल्ले स्पृशति कुरुतेन्याकरधृतिम् ।
पतन् नित्यं राधापदकमलमूले व्रजपुरे
तदित्थं वीथीषु भ्रमति स महालम्पटमणिः ॥२३२॥

एकस्या रतिचौर एव चकितं चान्यास्तनान्ते करम्
कृत्वा कर्षति वेणुनान्यसुदृशो धम्मिल्लमल्लीस्त्रजम् ।
धत्तेन्याभुजवल्लिमुत्पुलकितां सङ्केतयत्यन्यया
राधायाः पदयोर्लुठत्यलममुं जाने महालम्पटम् ॥२३३॥

प्रियांसे निक्षिप्तोत्पुलकभुजदण्डः क्वचिदपि
भ्रमन्वृन्दारण्ये मदकलकरीन्द्राद्भुतगतिः ।
निजां व्यञ्जन्नत्यद्भुतसुरतशिक्षां क्वचिदहो
रहः कुञ्जे गुञ्जाध्वनितमधुपे क्रीडति हरिः ॥२३४॥

दूरे सृष्ट्यादिवार्त्ता न कलयति मनाङ्नारदादीन् स्वभक्तान्
श्रीदामाद्यैः सुहृद्भिर्न मिलति हरति स्नेहवृद्धिं स्वपित्रोः ।
किन्तु प्रेमैकसीमां मधुररससुधासिन्धुसारैरगाधाम्
श्रीराधामेव जानन्मधुपतिरनिशं कुञ्जवीथीमुपास्ते ॥२३५॥

सुस्वादुसुरसतुन्दिलमिन्दीवरवृन्दसुन्दरं किमपि ।
अधिवृन्दाटवि नन्दति राधावक्षोजभूषणं ज्योतिः ॥२३६॥

कान्तिः कापि परोज्ज्वला नवमिलच्छ्रीचन्द्रिकोद्भासिनी
रामाद्यद्भुतवर्णकाञ्चितरुचिर्नित्याधिकाङ्गच्छविः ।
लज्जानम्रतनुः स्मयेन मधुरा प्रीणाति केलिच्छटा
सन्मुक्ताफलचारुहारसुरुचिः स्वात्मार्पणेनाच्युतम् ॥२३७॥

यन् नारदाजेशशुकैरगम्यं वृन्दावने वञ्जुलमञ्जुकुञ्जे ।
तत् कृष्णचेतोहरणैकविज्ञमत्रास्ति किञ्चित् परमं रहस्यम् ॥२३८॥

लक्ष्म्या यश्च न गोचरीभवति यन्नापुः सखायः प्रभोः
सम्भाव्योपि विरञ्चिनारदशिवस्वायम्भुवाद्यैर्न यः ।
यो वृन्दावननागरीपशुपतिस्त्रीभावलभ्यः कथम्
राधामाधवयोर्ममास्तु स रहोदास्याधिकारोत्सवः ॥२३९॥

उच्छिष्टामृतभुक्तवैव चरितं शृण्वंस्तवैव स्मरन्
पादाम्भोजरजस्तवैव विचरन् कुञ्जांस्तवैवालयान् ।
गायन् दिव्यगुणांस्तवैव रसदे पश्यंस्तवैवाकृतिम्
श्रीराधे तनुवाङ्मनोभिरमलैः सोऽहं तवैवाश्रितः ॥२४०॥

क्रीडन्मीनद्वयाक्ष्याः स्फुरदधरमणीविद्रुमश्रोणिभार –
द्वीपायामोन्तरालस्मरकलभकटाटोपवक्षोरुहायाः ।
गम्भीरावर्त्तनाभेर्बहुलहरिमहाप्रेमपीयूषसिन्धोः
श्रीराधायाः पदाम्भोरुहपरिचरणे योग्यतामेव चिन्वे ॥२४१॥

मालाग्रन्थनशिक्षया मृदुमृदुश्रीखण्डनिर्घर्षणा –
देशोनाद्भुतमोदकादिविधिभिः कुञ्जान्तसम्मार्जनैः ।
वृन्दारण्यरहःस्थलीषु विवशा प्रेमार्तिभारोद्गमात्
प्राणेशं परिचारिकैः खलु कदा दास्या मयाधीश्वरी ॥२४२॥

प्रेमाम्भोधिरसोल्लसत्तरुणिमारम्भेण गम्भीरदृग् –
भेदा भङ्गिमृदुस्मितामृतनवज्योत्स्नाञ्चित श्रीमुखी ।
श्रीराधा सुखधामनि प्रविलसद्वृन्दाटवीसीमनि
प्रेयोऽङ्के रतिकौतुकानि कुरुते कन्दर्पलीलानिधिः ॥ २४३ ॥

शुद्धप्रेमविलासवैभवनिधिः कैशोरशोभानिधिः
वैदग्धीमधुराङ्गभङ्गिमनिधिर्लावण्यसम्पन्निधिः ।
श्रीराधा जयतान् महारसनिधिः कन्दर्पलीलानिधिः
सौन्दर्यैकसुधानिधिर्मधुपतेः सर्वस्वभूतो निधिः ॥ २४४ ॥

नीलेन्दीवरवृन्दकान्तिलहरीचौरं किशोरद्वयम्
त्वय्येतत्कुचयोश्चकास्ति किमिदं रूपेण संमोहनम् ।
तन्मामात्मसखीं कुरु द्वितरुणीयं नौ दृढं श्लिष्यति
स्वच्छायामभिवीक्ष्य मुह्यति हरौ राधास्मितं पातु नः ॥२४५॥

सङ्गत्यापि महोत्सवेन मधुराकारां हृदि प्रेयसः
स्वच्छायामभिवीक्ष्य कौस्तुभमणौ सम्भूतशोका क्रुधा ।
उत्क्षिप्प्यप्रियपाणिमेव विनयेत्युक्त्वा गताया बहिः
सख्यै सास्त्र निवेदनानि किमहं श्रोष्यामि ते राधिके ॥२४६॥

महामणिवरस्त्रजं कुसुमसञ्चयैरञ्चितम्
महामरकतप्रभा प्रथित मोहित श्यामलम् ।
महारसमहीपतेरिव विचित्रसिद्धासनम्
कदा नु तव राधिके कबरभारमालोकये ॥२४७॥

मध्ये मध्ये कुसुमखचितं रत्नदाम्ना निबद्धम्
मल्लीमाल्यैर्घनपरिमलैर्भूषितं लम्बमानैः ।
पश्चाद्राजन्मणिवरकृतोदारमाणिक्यगुच्छम्
धम्मिल्लं ते हरिकरधृतं कर्हि पश्यामि राधे ॥२४८॥

विचित्राभिर्भङ्गीवितततिभिरहो चेतसि परम्
चमत्कारं यच्छंल् ललितमणिमुक्तादिललितः ।
रसावेशाद्विवित्तः स्मरमधुरवृत्ताखिलमहो –
द्भुतस्ते सीमन्ते नवकनकपट्टं विजयते ॥२४९॥

अहो द्वैधीकर्तुं कृतिभिरनुरागामृतरस –
प्रवाहैः सुस्निग्धैः कुटिलरुचिर श्याम उचितः ।
इतीयं सीमन्ते नवरुचिरसिन्दूररचिता
सुरेखा नः प्रख्यापयितुमिव राधे विजयते ॥२५०॥

चकोरस्ते वक्त्रामृतकिरणबिम्बे मधुकरस् –
तव श्रीपादाब्जे जघनपुलिने खञ्जनवरः ।
स्फुरन्मीनो जातस्त्वयि रससरस्यां मधुपतेः
सुखाटव्यां राधे त्वयि च हरिणस्तस्य नयनम् ॥२५१॥

स्पृष्ट्वा स्पृष्ट्वा मृदुकरतलेनाङ्गमङ्गं सुशीतम्
सान्द्रानन्दामृतरसह्रदे मज्जतो माधवस्य ।
अङ्के पङ्केरुहसुनयना प्रेममूर्तिः स्फुरन्ती
गाढाश्लेषोन्नमितचिबुका चुम्बिता पातु राधा ॥२५२॥

सदा गायं गायं मधुरतरराधाप्रिययशः
सदा सान्द्रानन्दा नवरसदराधापतिकथाः ।
सदा स्थायं स्थायं नवनिभृतराधारतिवने
सदा ध्यायं ध्यायं विवशहृदि राधापदसुधाः ॥२५३॥

श्यामं श्यामेत्यमृतरससंस्रावविवर्णाञ्जपन्ति
प्रेमौत्कण्ठ्यात् क्षणमपि सरोमाञ्चमुच्चैर्लपन्ती ।
सर्वत्रोच्चाटनमिव गता दुःखदुःखेन पारम्
काङ्क्षत्यह्नो दिनकरमलं क्रुध्यती पातु राधा ॥२५४॥

कदाचिद् गायन्ती प्रियरतिकलावैभवगतिम्
कदाचिद् ध्यायन्ती प्रियसहभविष्यद्विलसितम् ।
अलं मुञ्चामुञ्चेत्यतिमधुरमुग्धप्रलपितैर् –
नयन्ती श्रीराधा दिनमिह कदानन्दयतु नः ॥२५५॥

श्रीगोविन्द व्रजवरवधूवृन्दचूडामणिस्ते
कोटिप्राणाभ्यधिकपरमप्रेष्ठपादाब्जलक्ष्मीः ।
कैङ्कर्येणाद्भुतनवरसेनैव मां स्वीकरोतु
भूयो भूयः प्रतिमुहुरधिस्वामि संप्रार्थयेहम् ॥२५६॥

अनेन प्रीता मे दिशति निजकैङ्कर्यपदवीम्
दवीयो दृष्टीनां पदमहह राधा सुखमयी ।
निधायैवं चित्तेकुवलयरुचिं बर्हमुकुटम्
किशोरं ध्यायामि द्रुतकनकपीतच्छविपटम् ॥२५७॥

ध्यायंस्तं शिखिपिच्छमौलिमनिशं तन्नाम सङ्कीर्तयन्
नित्यं तच्चरणाम्बुजं परिचरंस्तन्मन्त्रवर्यं जपन् ।
श्रीराधापददास्यमेव परमाभीष्टं हृदा धारयन्
कर्हिस्यां तदनुग्रहेण परमोद्भूतानुरागोत्सवः ॥२५८॥

श्रीराधारसिकेन्द्ररूपगुणवद्गीतानि संश्रावयन्
गुञ्जामञ्जुलहारबर्हमुकुटाद्यावेदयंश्चाग्रतः ।
श्यामप्रेषितपूगमाल्यनवगन्धाद्यैश्च संप्रीणयंस् –
त्वत्पादाब्जनखच्छटारसह्रदे मग्ना कदा स्यामहम् ॥२५९॥

क्वासौ राधा निगमपदवीदूरगा कुत्र चासौ
कृष्णस्तस्याः कुचमुकुलयोरन्तरैकान्तवासः ।
क्वाहं तुच्छः परममधमः प्राण्यहो गर्ह्यकर्मा
यत् तन् नाम स्फुरति महिमा एष वृन्दावनस्य ॥२६०॥

वृन्दारण्ये नवरसकला कोमलप्रेममूर्त्तैः
श्रीराधायाश्चरणकमलामोदमाधुर्य्यसीमा ।
राधां ध्यायन् रसिकतिलकेनात्तकेलीविलासाम्
तामेवाहं कथमिह तनुं न्यस्य दासी भवेयम् ॥ २६१ ॥

हा कालिन्दि त्वयि मम निधिः प्रेयसा क्षालितोभूद्
भो भो दिव्याद्भुततरुलतास्तत्करस्पर्शभाजः ।
हे राधाया रतिगृहशुका हे मृगा हे मयूराः
भूयो भूयः प्रणतिभिरहं प्रार्थये वोऽनुकम्पाम् ॥ २६२ ॥

वहन्ती राधायाः कुचकलशकाश्मीरजमहो
जलक्रीडावेशाद् गलितमतुलप्रेमरसदम् ।
इयं सा कालिन्दी विकसितनवेन्दीवररुचि –
स्सदा मन्दीभूतं हृदयमिह सन्दीपयतु मे ॥२६३॥

सद्योगीन्द्र सुदृश्यसान्द्ररसदानन्दैकसन्मूर्त्तयः
सर्वेऽप्यद्भुतसन्महिम्नि मधुरे वृन्दावने सङ्गताः ।
ये क्रूरा अपि पापिनो न च सतां सम्भाष्य दृश्याश्च ये
सर्वान् वस्तुतया निरीक्ष्य परमस्वाराध्यबुद्धिर्मम ॥२६४॥

यद् राधापदकिङ्करीकृतहृदां सम्यग्भवेद् गोचरम्
ध्येयं नैव कदापि यद् धृदि विना तस्याः कृपास्पर्शतः ।
यत् प्रेमामृतसिन्धुसाररसदं पापैकभाजामपि
तद्वृन्दावनदुष्प्रवेशमहिमाश्चर्यं हृदि स्फूर्जतु ॥२६५॥

राधाकेलिकलासु साक्षिणि कदा वृन्दावने पावने
वत्स्यामि स्फुटमुज्ज्वलाद्भुतरसे प्रेमैकमत्ताकृतिः ।
तेजोरूपनिकुञ्ज एव कलयन् नेत्रादिपिण्डस्थितम्
तादृक्स्वोचितदिव्यकोमलवपुः स्वीयं समालोकये ॥२६६॥

यत्र यत्र मम जन्मकर्मभिर्नारकेऽथ परमे पदेऽथ वा ।
राधिकारतिनिकुञ्जमण्डली तत्र तत्र हृदि मे विराजताम् ॥२६७॥

क्वाहं मूढमतिः क्व नाम परमानन्दैकसारं रसः
श्रीराधाचरणानुभावकथया निस्यन्दमाना गिरः ।
लग्नाः कोमलकुञ्जपुञ्जविलसद्वृन्दाटवीमण्डले
क्रीडच्छ्रीवृषभानुजापदनखज्योतिश्छटाः प्रायशः ॥२६८॥

श्रीराधे श्रुतिभिर्बुधैर्भगवताप्यामृग्य सद्वैभवे
स्वस्तोत्रस्वकृपात एव सहजो योग्योप्यहं कारितः ।
पद्येनैव सदापराधिनि महन्मार्गं विरुध्य त्वदे –
काशे स्नेहजलाकुलाक्षि किमपि प्रीतिं प्रसादीकुरु ॥२६९॥

अद्भुतानन्दलोभश्चेन् नाम्ना रससुधानिधिः ।
स्तवोऽयं कर्णकलशैर्गृहीत्वा पीयतां बुधाः ॥२७०॥

**राधे किशोरी दया करो**

हम से दीन न कोई जग में, बान दया की तनक ढरो ।

सदा ढरी दीनन पै श्यामा, यह विश्वास जो मनहि खरो ।

विषम विषय विष ज्वाल माल में, विविध ताप तापनि जु जरो ।

दीनन हित अवतरी जगत में, दीनपालिनी हिय विचरो ।

दास तुम्हारो आस और (विषय) की, हरो विमुख गति को झगरो ।

कबहुँ तो करुणा करोगी श्यामा, यही आस ते द्वार पर्‍यो ।